https://www.mpboardonline.com

Roll No. ....................

**211**

# कक्षा 11 वीं परीक्षा, 2020-21

## [M-2903-A]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 20] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

***निर्देशा: –***

***सर्वे प्रश्नाः अनिवार्याः सन्ति।***

प्र.1 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) अधोलिखितेषु बहुव्रीहिः समासः अस्ति –

(क) पितरौ (ख) नीलकमलम्

(ग) अद्वितीय (घ) दशानन

(ii) "पञ्चपात्रम्" इत्यत्र समासः अस्ति–

(क) द्वन्द्व (ख) तत्पुरुष

(ग) द्विगु (घ) कर्मधारय

(iii) "बाणहत" इत्यस्मिन् पदे समासः अस्ति–

(क) तत्पुरुषः (ख) कर्मधारय

(ग) बहुव्रीहिः (घ) द्विगु

(iv) "नमस्ते" इत्यत्र सन्धिः अस्ति–

(क) व्यञ्जन सन्धिः (ख) विसर्ग सन्धि

(ग) यण सन्धिः (घ) दीर्घ सन्धिः

(v) "अनादर" इत्यस्मिन् पदे समासः अस्ति –

(क) द्वितीया तत्पुरुष (ख) अव्ययीभाव समासः

(ग) नञ् तत्पुरुषः (घ) द्विगु समासः



https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.2 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) अधोलिखितेषु अव्ययम् अस्ति –

(क) पठति (ख) गमनम्

(ग) गृहम् (घ) अद्य

(ii) 'तत्र बालकाः क्रीडन्ति' अस्मिन् वाक्ये अव्ययम् अस्ति –

(क) तत्र (ख) बालकः

(ग) क्रीडन्ति (घ) न कोऽपि

(iii) "प्राचार्य" पदे उपसर्गः अस्ति –

(क) प्रति (ख) प्र

(ग) प्रा (घ) प्राचा

(iv) अधोलिखितेषु अव्ययं नास्ति –

(क) अत्र (ख) तत्र

(ग) सर्वत्र (घ) रामः

(v) 'अग्निं विना धूमः' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(क) अग्निं (ख) विना

(ग) धूमः (घ) न कोऽपि

प्र.3 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) अधोलिखितेषु 'क्तवतु' प्रत्ययः अस्ति –

(क) गत्वा (ख) दृष्टवान्

(ग) गन्तुम् (घ) आगत्य

(ii) "बालिका" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(क) टाप् (ख) ङीप्

(ग) ङीप् (घ) क्त्वा

(iii) "ज्ञातुम्" इत्यत्र प्रत्ययः अस्ति–

(क) शानच् (ख) तुमुन्

(ग) क्त (घ) शतृ

(iv) "आदाय" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(क) ल्यप् (ख) शानच्

(ग) क्त्वा (घ) क्तिन्

(v) "जगन्नाथः" इत्यत्र सन्धिः अस्ति –

(क) स्वर सन्धिः (ख) व्यञ्जन सन्धिः

(ग) यण् सन्धिः (घ) दीर्घ सन्धिः



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.4 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) 'पठति' इत्यत्र लकारः अस्ति –

(क) लोट् लकारः (ख) लङ् लकारः

(ग) लट् लकारः (घ) लृट् लकारः

(ii) 'अस्तु' इत्यस्मिन् पदे धातु अस्ति –

(क) आस (ख) स्था

(ग) अस् (घ) दृश्

(iii) 'गच्छति' इत्यत्र वचनम् अस्ति –

(क) एकवचन (ख) द्विवचनम्

(ग) बहुवचनम् (घ) न कोऽपि

(iv) "यत्र पूज्यन्ते रमन्ते तत्र देवता" भवति –

(क) देवास्तु (ख) हीनास्तु

(ग) नार्यस्तु (घ) पुरुषास्तु

(v) '......................वचनं श्रेयः' भवति –

(क) असत्यस्य (ख) दुर्जनस्य

(ग) सज्जनस्य (घ) सत्यस्य

प्र.5 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) 'सज्जनः' इतस्य विलोमशब्दः अस्ति –

(क) विद्वान् (ख) पण्डितः

(ग) दुर्जनः (घ) गुरुजनः

(ii) 'सलिलम्' इत्यस्य पर्यायशब्दः अस्ति –

(क) अलम् (ख) कुलम्

(ग) धनम् (घ) जलम्

(iii) "भक्षकः" इत्यस्य विलोमशब्दः अस्ति –

(क) मूर्खः (ख) रक्षकः

(ग) पतितः (घ) दुर्जनः

(iv) अधोलिखितेषु पञ्चमी विभक्तिः अस्ति –

(क) मनसोः (ख) मनांसि

(ग) मनः (घ) मनसः

(v) अधोलिखितेषु तृतीया विभक्तिः अस्ति –

(क) वाचा (ख) वाचे

(ग) वाक्षु (घ) वाचाम्



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.6 त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत – (3×2=6)

(i) मन्त्रः कीदृशः भवति?

(ii) वेदस्य मुखं किं स्मृतम्?

(iii) पुष्करिण्याः नाम किमासीत्?

(iv) वसन्ते कायाग्निं कः बाधते?

(v) बालाय किं रोचते?

प्र.7 अधोलिखितेषु कवि परिचयं लिखत – (2×2=4)

(i) कालिदासस्य परिचयं लिखत।

(ii) बाणभट्टस्य परिचयं लिखत।

प्र.8 रिक्तस्थानानि पूरयत – (2×2=4)

(i) (अ) महाभारते .................................. पर्वाणि सन्ति। (सप्त / अष्टादश)

(ब) पुराणानि.................................................सन्ति। (अष्टादश / षोडश)

(ii) (अ) रामायणस्य रचयिता...............................अस्ति। (व्यासः / वाल्मीकिः)

(ब) ........................................................कालिदासस्य। (उपमा / अर्थगौरवम्)

प्र.9 कोष्ठके प्रदत्तेषु पदेषु समुचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत – (3)

(i) ......................................उभयतः वृक्षाः सन्ति। (नदी)

(ii) बालः जनकेन सह ............................गच्छति। (आपण)

(iii) ....................................................................नमः (देव)

प्र.10 शब्दरूपाणि लिखत – (3)

(i) राम शब्दस्य तृतीया विभक्तिः

(ii) युष्मद् शब्दस्य षष्ठी विभक्तिः

(iii) नदी शब्दस्य सप्तमी विभक्तिः



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.11 विपरीतार्थ – युग्ममेलनं कुरूत – (4)

(i) एकः शनैः

(ii) क्षिप्रम् मूर्खः

(iii) पण्डितः लघु

(iv) महत् वहु

प्र.12 प्रश्नानाम् उत्तराणि एकपदेन लिखत – (4)

(i) बालः कीदृशं सिंह कर्षति स्म?

(ii) निरुक्तं वेदस्य किमुच्यते?

(iii) उष्मणः गतिः कतिविधा?

(iv) सुब्बण्णस्य सहजाभिलाषः कस्मिन् आसीत्?

प्र.13 श्लोकस्य भाव समुचित पदैः पूरयतः – (4)

[नेत्रहीनस्य, वर्णोच्चारणम्, पाणिनये, ज्ञानरूपिणा, पाणिनीय–शिक्षा, सूत्ररचनाऽपि उद्घाटितम्]

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः।।

भावः – प्राचीनकाले गुरुशिष्यपरम्परया एव सर्वं ज्ञानं प्रदीयते स्म शनैः शनैः पुस्तकानि स्वरूपं प्राप्नुवन्ति येन जनाः स्वाध्यायेन अपि ज्ञानं प्राप्तुं समर्थाः अभवन्। पश्चात् .................... प्रारब्धा। वेदमन्त्राणम् उच्चारणेन सह एव............................ अपि शिक्षायाः रूपे प्रसिद्धमभवत् अस्मिन् प्रसङ्गे एव ...........................अपि विशिष्टं स्थानम्। अतएव कविः अत्र कथयति यत् अज्ञानेन................................लोकस्य पाणिनीयशिक्षायाः ....................अञ्जनेन शलाकया च नेत्रम् येन...........................तस्मै, ............वयं हृदा नमामः।



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत। (4)

प्र.15 मातृभाषया आशयं (भावार्थं) स्पष्टीकुरुत – (4)

सत्यस्य वचनं श्रेयः सत्यादपि हितं भवेत्।

यद्भूतहितमत्यन्तमेतत् सत्यं मतं मम।।

अथवा

नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परम्।

न हि तीव्रतरं किञ्चिद् अनृतादिह विद्यते।।

प्र.16 गद्यांशं पठित्वा प्रश्नान् उत्तरत – (2×4=8)

(क) इत्येवं चिन्तयत्येव मयि हारीतनामा जाबालमुनितनयः सवयोभिरपरैर्मुनिकुमारकैः सह तेनैव पथा तदेव कमलसरः सिस्नासुरुपागमत्। प्रायेणाकारण-मित्राण्यतिकरुणार्द्राणि च भवन्ति सतां चेतांसि। यतः स तदवस्थमवलोक्य मां सरस्तीरमानाययत्, स्वयं चादाय सलिलबिन्दूनपाययत्।

(i) किं नामा जाबालमुनितनयः?

(ii) मुनितनयः कुत्र सिस्नासुरुपागमत्?

(iii) मुनिः इति पदस्य पर्यायपदं किम्?

(iv) 'भवन्ति' इति पदे कः लकारः?

(ख) बालः – अहो बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

प्रथमा – वत्स! एनं बालमृगेन्द्रं मुञ्च, अपरं ते क्रीडनकं दास्यामि।

बालः – कुत्र, देहि तत् (इति हस्तं प्रसारयति)

द्वितीया – सुव्रते! न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीये उटजे मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।



https://www.mpboardonline.com

https://www.mpboardonline.com

(i) प्रथमा (तापसी) अपरं किं दास्यसि?

(ii) प्रथमा (तापसी) बालाय कं मोचयितुं कथयति?

(iii) द्वितीयाया (तापस्या) उटजे कः तिष्ठति?

(iv) बालः केन विरमयितुं न शक्यः?

प्र.17 पद्यांशं पठित्वा उत्तराणि लिखत – (2X4=8)

(क) आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।

राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।।

(i) शत्रुसंकटे प्राप्ते यः तिष्ठति सः कः?

(ii) दुर्भिक्षे यः सहायता करोति सः कः?

(iii) कः बान्धवः?

(iv) 'रिपु' इत्यस्य पर्यायपदं किम्?

(ख) श्रूयतां राजशार्दूल महादाश्चर्यमुत्तमम्।

अश्वमेधे महायज्ञे निवृत्ते यदभूद्विभो।।

(i) कः श्रूयताम्?

(ii) अत्र वक्ता कः अस्ति?

(iii) महायज्ञः कः वर्तते?

(iv) 'अश्वमेधे' कः विभक्तिः अस्ति?

प्र.18 स्वस्य प्राचार्यस्य कृते अवकाशार्थं प्रार्थना–पत्रं लिखत। (4)



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.19 अपठित गद्यांशं पठित्वा उत्तराणि लिखत – (5)

जीवने अनुशासनस्य महत्त्वपूर्णं स्थानमस्ति। अनुशासनं विना जीवने एकं पदमपि धर्तुं न सक्षमः वर्तते। गृहे समाजे ग्रामे नगरे देशे विदेशे च सर्वत्र अनुशासनेन सर्वाणि कार्याणि पूर्णानि भवन्ति। यथा कमलेन जलं शोभते तथैव अनुशासनेन मनुष्यजीवनं शोभते। नियमपालनम् एव अनुशासनम्। यत्र नास्ति अनुशासनं तत्र नास्ति उन्नतिः सुखं च। अतः जीवने प्रथमं सोपानम् अनुशासनम् उन्नतेः सुखस्य च अनुशासनपालनाय दण्डम् आवश्यकं करणीयम्।

(i) जीवने कस्य महत्त्वपूर्णं स्थानं वर्तते?

(ii) अनुशासनं विना किं धर्तुं जनः सक्षमः नास्ति?

(iii) कुत्र–कुत्र अनुशासनेन कार्याणि भवन्ति?

(iv) कस्य जीवनम् अनुशासनेन शोभते?

(v) "अनुशासनेन" इत्यस्मिन् पदे कः विभक्तिः?

प्र.20 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत – (10)

(i) कालिदासः

(ii) संस्कृतभाषा

(iii) परोपकारः

------------------------------------------------



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com